# मायावादखण्डनम्

**नरसिंहोखिलाज्ञानमतध्वांतदिवाकरः ।**
**जयत्यमितसज्ज्ञानसुखशक्ति पयोनिधिः । १ ।**

विमतम् अनारम्भणीयं अन्यथाप्रतिपादकत्वात् यदित्थं तत्तथा यथा सम्प्रतिपन्नम् । न हि ब्रह्मात्मैक्यस्य याथार्थ्यं तत्पक्षे । अद्वैतहानेः स्वरूपातिरेके । अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता । निर्विशेषत्वादात्मनो नानधिगतो विशेषः । सिद्धत्वात्स्वरूपस्य विशेषाभावाच्च नाज्ञानां कस्यचिदावरकम् । अनधिगतार्थगन्तृप्रमाणमिति च तन्मतम् । अज्ञानासम्भवादेव तन्मतमखिलमपाकृतम् । मिथ्यात्वे चैक्यस्यातत्त्वावेदकत्वमागमस्य स्यात् । सत्यता च भेदस्य । एवमेव प्रयोजनमपि निरस्तम् । स्वरूपत्वान्मोक्षस्य पूर्वमेव सिद्धत्वात् । अज्ञानासम्भवेन चतुर्थप्रकाराभावात्पञ्चमप्रकारतापि निरस्ता । विषयप्रयोजनाभावादेवाधिकारी च । तदभावादेव सम्बन्धोऽपि ।

**'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।**
**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।**
**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।**
**यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।**
**स सर्वविद्भजति मां सर्वभावेन भारत ।**
**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।**
**एतद्बुध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत'।**
**'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।**
**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ।**
**महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।**
**पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः' ।**
**'भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति'।**
**इति विष्णोः सर्वोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम्।**
**इति सर्वज्ञमुनिना मायावादतमोऽखिलम् ।**
**निरस्तं तत्त्ववादेन सतां संशयनुत्तये ।।**
**नास्ति नारायणसमं न भूतं न भविष्यति ।**
**एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम् ।।**

**इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं मायावादखण्डनं सम्पूर्णम्**